Shri Raghunatha Temple MSS. Library,
JAMMU

No. २६१/घ

Title साहित्यदर्पणकारिका:

Author विश्वनाथ कविराज:

Extent ५ पत्र Age

Subject अलङ्कारशास्त्र

साहित्यदर्पणकारिकाः

३५८

२६१

५ पत्राणि

श्रीः॥ रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः॥ आलंबनोद्दीपनाख्यौ तस्य भेदावुभौ मतौ ।१। आलंबनो नायकादिस्तमालंब्य रसोदयात् ।
त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही । दक्षोनुकूललोकस्तेजोवैदग्ध्यशीलवान्नेता ।२। धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च । धी
रप्रशांत इत्ययमुक्तः प्रथमं चतुर्भेदः ।३। अविकत्थनः क्षमावानतिगंभीरो महासत्त्वः॥ स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ।४। मा
यापरः प्रचंडश्चपलोहंकारदर्पभूयिष्ठः॥ आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ।५। निश्चिंतो मृदुरनिशं कलापरो धीरललितः
स्यात् । सामान्यगुणैर्भूयान् द्विजादिको धीरशांतः स्यात् ।६। एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा । एषु त्वनेकमहिलासु समरागो द
क्षिणः कथितः ।७। कृतागा अपि निःशंकस्तर्जितोपि न लज्जितः । दृष्टदोषोपि मिथ्यावाक् कथितो धृष्टनायकः ।८। अनुकूल एकनिरतः शठोय
मेकत्र बद्धभावो यः । दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति ।९। त्रैविध्यात्स्वेषामुत्तममध्यमाधमत्वेन । उक्ता नायकभेदाश्चत्वा
रिंशत्तथाष्टौ च ।१०। दूरानुवर्त्तिनि स्यात्तस्य प्रासंगिकेतिवृत्ते च । किंचित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः ।११। शृंगारस्य सहा
या विटचेटविदूषकाद्याः स्युः । भक्ता नर्मसु निपुणाः कुपितवधूमानभंजनाः शुद्धाः ।१२। संभोगहीनसंपद्विटस्तु धूर्त्तः कलैकदेशज्ञः । वेशोप
चारकुशलो वाग्मी मधुरोथ बहुमतो गोष्ठ्यां ।१३। कुसुमवसंताद्यभिधः कर्मवपुर्वेषभाषाद्यैः । हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः ।१४।

मंत्रीस्यादर्थानां चिंतायां तद्वदवरोधे· वामनषंढकिरातम्लेछ[redacted]भीराः शकारकुब्जाद्याः। १५ मदमूर्खताभिमानी दुःकुलतैश्वर्यसंयुक्तः। सोयमनूढा
भ्राता राज्ञः श्यालः शकार इत्युक्तः।१६। दंडे सुहृत्कुमाराटविकाः सामंतसैनिकाद्याश्च· ऋत्विक्पुरोधसः स्युर्धर्मे विदस्तापसास्तथा धर्मे·१७। उत्तमाः
:पीठमर्दाद्यामध्यो विटविदूषकौ· तथा शकारचेटाद्या अधमाः परिकीर्त्तिताः।१८। निसृष्टार्थो मितार्थश्च तथा संदेशहारकः। कार्यप्रेष्यास्त्रि
धा दूतास्तस्यापि तथाविधाः।१९। उभयोर्भावमुन्नीय स्वयं वदति चोत्तरं· सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः।२०। मितार्थकारी कार्य
स्य सिद्धिकारी मितार्थकः। यावद्भाषितसंदेशहारी संदेशहारकः।२१। शोभाविलासोमाधुर्यगांभीर्यधैर्यतेजसी· ललितौदार्यमित्यष्टौ सा
त्विकाः पौरुषा गुणाः।२२। शूरता दक्षता सत्यं महोत्साहोनुरागिता· नीचे घृणाधिके स्पर्द्धा यतः शोभेति तां विदुः।२३। धीरा दृष्टिर्गतिश्चित्रा
विलासे सस्मितं वचः। संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्त्तितं·२४। भीशोकक्रोधहर्षाद्यैर्गांभीर्यं निर्विकारिता· व्यवसायादचलनं धैर्यं विघ्नेम
हत्यपि·२५। अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्· प्राणात्ययेप्यसहनं तत्तेजः समुदाहृतं·२६। वाग्वेषयोर्मधुरता तद्वच्छृंगारचे
ष्टितं ललितं· दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता·२७। अथ नायिका त्रिभेदा स्वान्या साधारणी स्त्रीति· नायकसामान्यगुणै
र्भवति यथासंभवैर्युक्ता·२८। विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया· सापि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति·२९। तत्र

प्रथमावतीर्णयौवनमदनविकाररतौ वामा। कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥ ३०॥ मध्या विचित्रसुरता प्ररूढस्मरयौवना। ईष
त्प्रगल्भवचना मध्यमव्रीडिता तथा॥ ३१॥ स्मरान्धा गाढतारुण्या समस्तरतिकोविदा। भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका॥ ३२॥ ते च
धीरा चाधीरा च धीराधीरेति षड्विधे। तत्र सोत्प्रासवक्रोक्त्या मध्या धीरा वदेद्रुषा। धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः। प्रगल्भा
यदि धीरा स्याच्छन्नकोपाकृतिस्तदा॥ ३४॥ उदास्ते सुरते तत्र दर्शयन्त्यादरं न हि। धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुं॥ ३५॥ तर्जयेत्ता
डयेदन्या प्रत्येकं ता अपि द्विधा। कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति॥ ३६॥ मध्याप्रगल्भयोर्भेदास्तेन द्वादश कीर्त्तिताः। मुग्धा त्वेके
व तेन स्युः स्वीयाभेदास्त्रयोदश॥ ३७॥ परकीया द्विधा प्रोक्ता परोढा कन्यका तथा। यात्रादिनिरतान्योढा कुलटा गलितत्रपा॥ ३८॥
कन्या त्वजातोपयमा सलज्जा नवयौवना। धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका॥ ३९॥ निर्गुणानपि न द्वेष्टि न रज्यति गु
णिष्वपि। वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः॥ ४०॥ काममङ्गीकृतमपि परिक्षीणधनं नरं। मात्रा निःकाशयेदेषा पुनः संधानकां
क्षया। तस्कराः पुद्दकाः मूर्खाः सुखप्राप्तधनास्तथा। लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः। एषापि मदनायत्ता क्वापि सत्या
नुरागिणी॥ ४२॥ रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभं। अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः॥ ४३॥ स्वाधीनभर्तृका तद्वत्खण्डिता

२ ऽथाभिसारिका·कलहांतरिताविप्रलब्धाप्रोषितभर्त्तृका·४४।अन्यावासकसज्जास्याद्विरहोत्कंठितातथा·कांतोरतिगुणाकृष्टोनजहातियदंतिकं·४५।
विचित्रविभ्रमासक्तासास्यात्स्वाधीनभर्त्तृका·पार्श्वमेतिप्रियोयस्याअन्यसंभोगचिह्नितः।साखंडितेतिकथिताधीरैरीर्ष्याकषायिता·अभिसा
सारयतेकांतंयामन्मथवशंवदा·स्वयंवाभिसरत्येषाधीरैरुक्ताऽभिसारिका।संलीनास्वेषुगात्रेषुमूकीकृतविभूषणा·अवगुंठनसंवीताकु
लजाभिसरेद्यदि·विचित्रोज्वलवेशाश्चुरणन्नूपुरकंकणा·४८।प्रमोदस्मेरवदनास्याद्वेश्याभिसरेद्यदि·मदस्खलितसंलापाविभ्रमोत्फु
ल्ललोचना·५०।आविद्धगतिसंचारास्यात्प्रेष्याभिसरेद्यदि·क्षेत्रंवाटीभग्नदेवालयोदूतीगृहंवनं·५१।मालामंचाःश्मशानानिनद्यादीनांत
टीयथा·एवंकृताभिसाराणांपुंश्चलीनांविनोदने·५२।स्थानान्यष्टौतथाध्वांतछन्नेकुत्रचिदाश्रयः।चाटुकारमपिप्राणनाथंरोषाद
पास्यया·पश्चात्तापमवाप्नोतिकलहांतरितातुसा·प्रियःकृत्वापिसंकेतंयस्यानायातिसन्निधिं·५४।विप्रलब्धातुसाज्ञेयानितांत
मवमानिता·नानाकार्यवशाद्यस्यादूरदेशंगतःपतिः।५५।सामनोभवदुःखार्त्ताभवेत्प्रोषितभर्त्तृका·कुरुतेमंडनंस्वस्यसज्जि
तेवासवेश्मनि·५६।सातुवासकसज्जास्याद्विदितप्रियसंगमा·आगंतुंकृतचित्तोपिदैवान्नायातियत्प्रियः।तदनागमदुःखार्त्ता
विरहोत्कंठितातुसा·इतराअप्यसंख्यास्तानोक्ताविस्तरशंकया·५८।यौवनेसत्वजास्तासामष्टाविंशतिसंख्यकाः।अलंकारास्त
त्रभावहावहेलास्त्रयोंगजाः।५९।शोभाकांतिश्चदीप्तिश्चमाधुर्यंचप्रगल्भता·औदार्यंधैर्यमित्येतेसप्तैवस्युरयत्नजाः।६०।लीलावि

लासो विच्छित्तिर्विब्बोकः किलकिंचितं मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥६१॥ विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलं । हसितं चकितं के
लिरित्यष्टादशसंख्यकाः ॥६२॥ स्वभावजाः स्युर्भावाद्या दश पुंसां भवंत्यपि । [redacted] निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ।
६३॥ भ्रूनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः । भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते ॥६४॥ हेलात्यंतसमालक्ष्यविकारः स्यात्स एव तु । रूपयौ
वनलालित्यभोगाद्यैरंगभूषणं । ६५ शोभा प्रोक्ता सैव कांतिर्मन्मथाप्यायितद्युतिः । कांतिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥६६॥ सर्वावस्था
विशेषेषु माधुर्यं रमणीयता । निःसाध्वसत्वं प्रागल्भ्यमौदार्यं विनयः सदा ॥६७॥ उक्तात्मश्लाघना धैर्यं मनोवृत्तिरचंचला । अंगैर्वेषैरलंका
६८ रैः प्रेमाभिर्वचनैरपि । प्रीतिप्रयोजितैर्लीला प्रियस्यानुकृतिं विदुः । यानस्थानासनादीनां मुखनेत्रादिकर्मणां ॥६९॥ विशेषस्तु विलासः
स्यादिष्टसंदर्शनादिना । स्तोकाप्याकल्परचना विच्छित्तिः कांतिपोषकृत् ॥७०॥ विब्बोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः । स्मितशुष्करुदित
हसितत्रासक्रोधश्रमादीनां । सांकर्यं किलकिंचितमभीष्टतमसंगमादिजाद्धर्षात् ॥७१॥ सद्भावभाविते चित्ते वल्लभस्य कथादिषु । मोट्टायि
तमिति प्राहुः कर्णकंडूयनादिकं ॥७२॥ केशस्तनाधरादीनां ग्रहे हर्षेऽपि संभ्रमात् । प्राहुः कुट्टमितं नेति शिरःकरविधूननं ॥७३॥ त्वरया हर्षरा
गादेर्दयितागमनादिषु । अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः ॥७४॥ सुकुमारतयांगानां विन्यासो ललितं भवेत् । मदो विकारः सौभाग्ययौ

३ वनाद्यवलेपजः।७५। वक्तव्यकालेप्यवचो व्रीडया विकृतं मतं। तपनं प्रियविच्छेदे स्मरावेगोत्थचेष्टितं।७६। अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः।
वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तज्ज्ञवेदिभिः।७७। भूषाणां मूर्द्धरचना रथ्यादिव्यग्रवेक्षणं। रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके।७८। रम्यवस्तुसमा
3 लोके लोलतास्यात्कुतूहलं। हसितं तु वृथाहासो यौवनोद्भेदसंभवः।७९। कुतोपि दयितस्याग्रे च कितं भयसंभ्रमः। विलासे सहकांतेन क्रीडितं के
लिरुच्यते।८०। दृष्ट्वा दर्शयति व्रीडां संमुखं नैव पश्यति। प्रच्छन्नं वा भ्रमंतं वातिक्रांतं पश्यति प्रियं।८१। बहुधा पृच्छ्यमानापि मंदं मंदमधोमुखी
सगद्गदस्वरं किंचित्प्रियं प्रायेण भाषते। अन्यैः प्रवर्त्तितां शश्वत्सावधाना च तत्कथां। शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी।८२।
चिराय सविधे स्थानं प्रियस्य बहु मन्यते। विलोचनपथं चास्य न गच्छत्यनलंकृता।८५। कापि कुंतलसंख्यानसंयमव्यपदेशतः। बाहुमूलं स्तनौ नाभिपंकजं द
र्शयेत्स्फुटं।८६। आनंदयति वाग्दानैः प्रियस्य परिचारकान्। विश्वसित्यस्य मित्रेषु बहुमानं करोति च।८७। सखीमध्ये गुणान्ब्रूते स्वधनं प्रददाति च। सुप्ते
स्वपिति दुःखेस्य दुःखं धत्ते सुखे सुखं।८८। स्थिता दृष्टिपथे शश्वत्प्रियं पश्यति दूरतः। आभाषते परिजनं संमुखे स्मरविक्रियं।८९। यत्किंचिदपि सं
वीक्ष्य कुरुते हसितं मुधा। कर्णकंडूयनं तद्वत्कबरीमोक्षसंयमौ। जृंभते स्फोटयत्यंगं बालमाश्लिष्य चुंबति। भाले तथा वयस्याया आचरत्ते तिलक
क्रियां।९१। अंगुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते। दशति स्वाधरं चापि ब्रूते प्रियमधोमुखी।९२। न मुंचति च तं देशं नायको यत्र तिष्ठति। आगच्छति

इत्याः सखीनटीदासीधात्रेयीप्रातिवेशिका: २१

गृहं तस्य कार्यव्याजेन केनचित् ॥ ३ ॥ दृष्ट्वा किमपि कान्तेन ध्वांतो गेह कुमन्यते । निःसंहत्यतितन्धोगे वियोगे मलिना कृशा ॥ ४ ॥ मन्यते बकुलच्छीलं तालियं
मन्यते प्रियं प्रार्थयस्त्यमनुत्यातिसुमानपरिवर्त्तते ॥ ५ ॥ विकारान्सात्विकान स्य संमुखी नाधिगच्छति भाषते स्वन्त्वं स्निग्धं मनुरक्तानितं विनी ।
२६ ॥ एते स्वधिकलज्जानि चेष्टितानि नवस्त्रियाः ॥ मध्यवीडानि मध्यायाः स्वं समानत्रपाणि तु । अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वीरयोषितः ।
नैरवप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः ॥ २९ ॥ दूतीसंप्रेषितैर्नायाम्यानायाभिव्यक्तिरिष्यते । बालाप्रव्रजिताकारुशिल्पिन्याद्याः स्वयं तथा । कु
लाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ॥ १० ॥ माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः । एता अपि यथायोगं दृत्तमा [redacted] धममध्यमाः ॥ १ ॥
धीरोद्धतः पापकारी व्यसनी प्रतिनायकः । उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ॥ १२ ॥ आलंबनस्य चेष्टाद्या देशकालादयस्तथा । उद्बुद्धं कारणैः स्वैः स्वैर्ब
हिर्भावं प्रकाशयन् ॥ १३ ॥ लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः । उक्ताः स्त्रीणामलंकारा अंगजाश्च स्वभावजाः ॥ १४ ॥ तद्रूपाः सात्विका भावास्त
थाचेष्टाः परा अपि । विकाराः सत्वसंभूताः सात्विकाः परिकीर्त्तिताः ॥ १५ ॥ सत्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः ॥ स्तंभः स्वेदोऽथ रोमांचः स्वरभंगश्च वेपथुः ॥ १६ ॥ वैवर्ण्यमश्रु
प्रलय इत्यष्टौ सात्विकाः स्मृताः ॥ स्तंभश्चेष्टाप्रतीघातो भयचेष्टामयादिभिः ॥ १७ ॥ वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ॥ हर्षाद्भुतभयादिभ्यो रोमांचो रोम
विक्रियाः ॥ मदसंमदहर्षाद्यैर्वैस्वर्यं गद्गदं विदुः ॥ रागद्वेषश्रमादिभ्यः कंपो गात्रस्य वेपथुः ॥ विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ॥ १९ ॥ अश्रु नेत्रोद्भवं
वारि क्रोधदुःखप्रहर्षजं ॥ प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥ ११ ॥ विशेषादाभिमुख्येन चरंतो व्यभिचारिणः ॥ स्थायिन्युन्मग्ननिर्मग्नाः स्त्रयस्त्रिं

४ शब्दते मताः॥१११॥ निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः। औत्सुक्योन्मादशंकास्मृतिमति
सहिता व्याधिसंत्रासलज्जाहर्षासूयाविषादाः सधृतिचपलताग्लानिचिंतावितर्काः॥११२॥ तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननं। दैन्यचिंताश्रुनिश्वास
वैवर्ण्योच्छ्वसितादिकृत्॥११३॥ आवेगः संभ्रमस्तत्र हर्षजे पिंडितांगता। राजविद्रवजादेस्तु शस्त्रनागादियोजनं। गजादेः स्तंभकंपादिः पांस्वाद्याकुलता
गजे। इष्टाद्धर्षः शुचोऽनिष्टात्ज्ञेयाश्चान्ये यथायथं॥११५॥ दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत्। खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः॥११६॥ सं
मोहानंदसंभेदो मदो मद्योपयोगजः। अमुना चोत्तमः शेते मध्यो हसति गायति॥११७॥ अधमप्रकृतिश्चापि परुषं वक्ति रोदिति। अप्रतिपत्तिर्जडता स्यादि
ष्टानिष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र॥११८॥ शौर्यापराधादिभवं भवेच्चंडत्वमुग्रता। तत्र स्वेदशिरःकंपतर्जना
ताडनादयः॥११९॥ मोहो विचित्तता भीतिदुःखावेगानुचिंतनैः। मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत्॥१२०॥ निद्रापगमहेतुभ्यो विबोधश्चेतनागमः। जृंभांगभंग
नयनमीलनांगावलोककृत्॥१२१॥ स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः। कोपावेगभयग्लानिसुखदुःखादिकारकः॥१२२॥ मनःक्षेपस्त्वपस्मारो ग्र
हाद्यावेशनादिजः। भूपातकंपप्रस्वेदफेनलालादिकारकः॥१२३॥ गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः। अवज्ञासविलासांगदर्शनाविनयादि
कृत्॥१२४॥ शराद्यैर्मरणं जीवत्यागोंगपतनादिकृत्। आलस्यं श्रमगर्भाद्यैर्जाड्यं जृंभा [illegible] दिकृत्॥१२५॥ निद्राक्षेपापमानादेरमर्षोऽभिनिविष्टता। नेत्ररागशि
रःकंपभ्रूभंगोत्तर्जनादिकृत्॥१२६॥ चेतःसंमीलनं निद्रा श्रमक्लममदादिजं। जृंभाक्षिमीलनोच्छ्वासगात्रभंगादिकारकं॥१२७॥ भयगौरवह्र्यादेर्लज्जा

धाकारगुप्तिरवहित्था॰ व्यापारांतरशास्त्रान्यभाषणालोकनादिकरी॰१२८। इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता॰ चित्ततापत्वरास्वेददीर्घनिश्वसितादि
कृत्॰१२९। चित्तस्य भ्रम उन्मादः कामशोकभयादिभिः। अस्थानहासरुदितगीतप्रलपनादिकृत्॰१३०। परक्रौर्यात्मदोषाद्यैः शंकानर्थस्य चिंतनं॰ वैव
र्ण्यकंपवैस्वर्यपार्श्वालोकास्यशोषकृत्॰१३१। सम्यग्ज्ञानविंताद्यैर्भ्रूसमुल्लासनादिकृत्॰ स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते॰१३२। नीतिमार्गा
नुसृत्यादेरर्थनिर्धारणं मतिः। स्मेरताधृतिसंतोषौ बहुमानश्च तद्भवाः॥१३३। व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कंपनादिकृत्॰ निर्घातविद्युदुल्काद्यै
स्त्रासः कंपादिकारकः॥१३४। धार्ष्ट्याभावो व्रीडावदनानमनादिकृद्दुराचारात्॰ हर्षस्त्विष्टावाप्तेर्मनःप्रसादोश्रुगद्गदादिकरः॥१३५। असहनमन्यगुणर्द्धी
नामौद्धत्यादसहिष्णुता। दोषाख्यानभ्रुविभेदावज्ञाक्रोधेंगितादिकृत्॥१३६। उपायाभावजन्मा तु विषादः सत्वसंक्षयः। निश्वासोच्छ्वासहृत्तापसहायान्वेषणा
दिकृत्॰१३७। ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः। सौहित्यवचनोल्लासहासप्रतिभादिकृत्॰१३८। मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः। त
त्र भर्त्सनपारुष्यस्वच्छंदाचरणादयः।१३९। रत्यायासमनस्तापक्षुत्पिपासादिसंभवा॰ ग्लानिर्निःप्राणताकंपकार्श्यानुत्साहनादिकृत्॰१४०। ध्या
नं चिंताहितानाप्तेः शून्यताश्वासतापकृत्॰ तर्को विचारः संदेहा[illegible]भ्रूशिरोंगुलिनर्तकः।१४१। इत्यादयोप्यनियमाद्रसे स्युर्व्यभिचारिणः। श्रृंगारवी
रयोर्हासो वीरे क्रोधस्तथा मतः।१४२। शांते जुगुप्सा कथिता व्यभिचारितया पुनः। इत्याद्यन्यत्समुन्नेयं स्वयं भावितबुद्धिभिः।१४३। अविरुद्धा विरु
द्धा वा यं तिरोधातुमक्षमाः। आस्वादांकुरकंदोसौ भावः स्थायीति संमतः।१४४। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा॰ जुगुप्सा विस्मयश्चाष्ट
मश्चोक्ताः शमोपरः।१४५। रतिर्मनोनुकूलेर्थे मनसः प्रवणायितं॰ वागादिवैकृतैश्चेतोविकासो हास इष्यते॰१४६। इष्टनाशादिभिश्चेतोवैक्ल

५ यं शोकशब्दभाक्॥ कार्यारंभेषु संरंभः स्थेयानुत्साह इष्यते॥१४७॥ प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते॥ रौद्रशक्त्यानुजनितं चित्तवैक्लव्यजं भयं॥
१४८॥ दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा॥ विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु॥१४९॥ विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः॥ शमो निरी
हावस्थायां स्वात्मविश्रामजं सुखं॥१५०॥ शृंगारहास्यकरुणरौद्रवीरभयानकाः॥ बीभत्सोऽद्भुत इत्यष्टौ रसाः शांतस्तथा मतः॥१५१॥ शृंगं हि मन्म
थोद्भेदस्तदागमनहेतुजः॥ उत्तमप्रकृतिप्रायो रसः शृंगार इष्यते॥१५२॥ परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीं॥ आलंबनं नायिकाः स्युर्दक्षि
णाद्याश्च नायकाः॥१५३॥ चंद्रचंदनरोलंबरुताद्युद्दीपनं मतं॥ भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥१५४॥ त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्य
भिचारिणः॥ विप्रलंभोऽथ शृंगार इत्येष द्विविधो मतः॥१५५॥ यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलंभोऽसौ॥ स च पूर्वानुरागमानप्रवास
करुणात्मकश्चतुर्धा स्यात्॥१५६॥ श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः॥ दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते॥१५७॥ श्रवणं तु भवेत्त
त्र दूतबंदिसखीमुखात्॥ इंद्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनं॥१५८॥ अभिलाषश्चिंतास्मृतिगुणकथनोद्वेगसंप्रलापाश्च॥ उन्मादोऽथ व्या
धिर्जडता मृतिरिति दशात्र कामदशाः॥१५९॥ अभिलाषः स्पृहा॥ चिंता प्राप्त्युपायादिचिंतनं॥ उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि॥ अलक्ष्यवाक्प्र
लापः स्याच्चेतसो भ्रमणाद्भृशं॥ व्याधिस्तु दीर्घनिश्वासपांडुताकृशतादिकृत्॥१६०॥ जडता हीनचेष्टत्वमंगानां मनसस्तथा॥ मरणं प्रागुरसाविच्छे
दहेतुत्वान्नैव वर्ण्यते॥१६१॥ जातप्रायं तु तद्वाच्यं चेतसाकांक्षितं तथा॥ वर्ण्यते यदि प्रत्युज्जीवनं स्याददूरतः॥१६२॥ नीलीकुसुंभमंजिष्ठैः पूर्वरा
गोऽपि च त्रिधा॥ न चातिशोभते यन्नापैति प्रेम मनोगतं॥१६४॥ तन्नीलीराग [illegible] सीनयोः॥ कुसुंभरागं तत्प्राहुर्यदपैति च शोभते॥१६५॥ म